नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

No. of Printed Pages — 7

# S—71—Sans. (T.L.)

## माध्यमिक परीक्षा, 2010

### तृतीय भाषा ( Third Language )

### संस्कृतम्

### ( SANSKRIT )

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तरपुस्तिकायां निम्नलिखिततालिकां निर्माय सम्मुखे एव लेखनीयम् ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) 'अनुस्वारस्य' उच्चारणस्थानमस्ति

(अ) कण्ठः (ब) नासिका

(स) दन्तः (द) मूर्धा । $\frac{1}{2}$

(ii) विसर्गस्य उच्चारणं भवति

(अ) ओष्ठः (ब) तालुः

(स) कण्ठः (द) मूर्धा । $\frac{1}{2}$

(iii) सिन्धुनद्यामेव पंजाबप्रदेशस्य नदीनां क्रमशः संगमः भवति

(अ) सप्त (ब) पञ्च

(स) षट् (द) अष्ट । $\frac{1}{2}$

(iv) ताण्डवनृत्यानन्तरं शिवः स्वढ्वकां .................... वारम् अवादयत् ।

(अ) चतुर्दश (ब) पञ्चदश

(स) षोडश (द) सप्तदश । $\frac{1}{2}$

2. निम्नलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत — $\frac{1}{2} + \frac{1}{2} = 1$

(i) 103 ( एक सौ तीन )

(ii) 180 ( एक सौ अस्सी )

3. (i) 'षकारस्य' उच्चारणस्थानं किं भवति ? $\frac{1}{2}$

(ii) एकार ऐकारयोः वर्णयोः उच्चारणस्थानं किं भवति ? $\frac{1}{2}$

4. अधोलिखिताभ्यामुपसर्गधातुभ्यां क्रियापदं रचयत — $\frac{1}{2} + \frac{1}{2} = 1$

(i) आ + नी (ii) निर् + गम् ।

5. अधोलिखित पदयोः प्रयुक्तमुपसर्गयोः लिखत — $\frac{1}{2} + \frac{1}{2} = 1$

(i) अपकर्षः (ii) निर्जनम् ।

6. अधोलिखितेषु पदेषु सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत — 1 + 1 + 1 = 3

(i) उत्पन्नः

(ii) त्वं पठसि

(iii) जगदीशः ।

7. अधोलिखितेषु पदेषु सन्धिं कृत्वा तस्य नाम-निर्देशनं कुरुत — 1 + 1 + 1 = 3

(i) कः + चित्

(ii) रामः + अवदत्

(iii) निः + सन्देहः ।

8. निम्नलिखितपदयोः संस्कृते समासविग्रहं कृत्वा समासस्य नाम लिखत — 1 + 1 = 2

(i) घनश्यामः

(ii) चक्रपाणिः ।

9. निम्नलिखितपदयोः समस्तपदं निर्मित्वा समासस्य नामोल्लेखं कुरुत — $\frac{1}{2} + \frac{1}{2} = 1$

(i) कृष्णस्य समीपम्

(ii) सप्तानां ऋषीणां समाहारः इति ।

10. रेखाङ्कित पदयोः प्रयुक्त विभक्तिः तत् कारणं च लिखत — 1 + 1 = 2

(i) छात्राः विद्यालयं प्रति गच्छन्ति ।

(ii) पिता पुत्राय क्रुध्यति ।

11. अधोलिखितपदयोः प्रकृतिप्रत्ययौ लेखनीयौ — $\frac{1}{2} + \frac{1}{2} = 1$

(i) नीतिः

(ii) हन्तव्यः ।

12. धातु-प्रत्ययं च संयोज्य पदरचनां कुरुत — $\frac{1}{2} + \frac{1}{2} = 1$

(i) दा + ल्युट्

(ii) प्रच्छ् + शतृ ।

13. निर्देशानुसारं शब्दरूपाणि लिखत — 1 + 1 + 1 = 3

(i) तत् ( स्त्रीलिङ्ग शब्दः प्रथमा विभक्ति, एकवचने )

(ii) अस्मद् ( चतुर्थी विभक्ति, एकवचने )

(iii) हरि ( तृतीया विभक्ति, एकवचने )

14. अधोलिखितेषु क्रियापदेषु धातु-लकार-पुरुषवचनानि लिखत — 1 + 1 + 1 = 3

(i) अलिखन्

(ii) हनिष्यामि

(iii) सेवन्ते ।

15. अधोलिखित गद्यांशं पठित्वा एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं संस्कृतमाध्यमेन लिखत — 2 + 3 + 5 = 10

आधुनिक युगे सूचना प्रौद्योगिक्यां क्रान्तिकारिपरिवर्तनं प्रतिदिनं पश्यामः — यथा दूरभाषः, दूरदर्शनं, चलदूरभाषः, संगणकयन्त्रम् इत्यादयः । सूचनासंसाधनानां विस्तारो अभवत् । अन्ययन्त्राणामपेक्षया संगणकयन्त्रस्य कार्यक्षमता अधिका विद्यते । आंग्लभाषायाम् अस्यकृते कम्प्यूटर इति शब्दः अस्ति । अत्र 'कम्प्यूटर' मूलशब्दः ! संगणकेन टंकणयन्त्रस्य, गणकयन्त्रस्य, दूरदर्शनयन्त्रस्य च सर्वाः विशेषता आत्मसात्कृताः । संगणके टंकणाय अक्षरकुञ्जिकापट्टः गणकसामर्थ्य दूरदर्शन यवनिका च सम्प्रविष्टाः भवन्ति । आदेशग्राहकः ( इनपुट ) आदेशानुपालकः ( आउटपुट ) मस्तिष्कं ( प्रोसेसर ), निर्देशसमूहः ( प्रोग्राम ), स्मृतिपटलश्च ( मेमोरी ) प्रायः पञ्चावश्वात्मकं यन्त्रमिदम् ।

अधुना संगणकयन्त्रं शिक्षायाः अभिन्नम् अङ्गम् अस्ति । इदं अत्यल्पसमये सर्वाणि कार्याणि साफल्येन सम्पादयति ।

(अ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।

(ब) उपर्युक्त गद्यांशस्य संक्षिप्तीकरणं कुरुत ।

(स) (i) संगणकयन्त्रस्य कृते आंग्लभाषायां कः शब्दः अस्ति ?

(ii) कस्य यन्त्रस्य अन्ययन्त्राणामपेक्षया कार्यक्षमताधिका विद्यते ?

(iii) संगणकयन्त्रम् कति अवयवात्मकं भवति ?

(iv) आदेशग्राहकः इति शब्दस्यकृते आंग्लभाषायां कः शब्दः अस्ति ?

(v) अधुना संगणकयन्त्रं कस्याः अभिन्नम् अङ्गम् अस्ति ?

16. निम्नलिखितेषु **द्वयोः** गद्यांशयोः हिन्दी भाषायाम् अनुवादः कुरुत — 3 + 3 = 6

(अ) अस्माकं देशस्य नाम भारतवर्षम् अस्ति । अयं भरतस्य देशः अस्ति अतः भारतनाम्ना प्रसिद्धः अस्ति । ऋषभस्य पुत्रः भरतः वीरः आसीत् तस्य नाम्ना अयं देशः 'भारत' इति अस्ति । भरतस्य कुले जाता अपि भारताः । भारतानां देशः भारतः । शकुन्तला-दुष्यन्तयोः पुत्रस्य नाम अपि भरतः आसीत् । सः अपि चक्रवर्ती सम्राटः आसीत् । प्रजानां भरणात् मनुः अपि भरत उच्यते । अस्माकं देशे अन्ये अपि भरताः अभवन् , यथा— रामस्य अनुजः भरतः, जडभरतः, नाट्यशास्त्रस्य रचयिता भरतः । एवं भरतस्य, भरतानां भारतानां वा देशः भारतः ।

(ब) कश्चित् शृगाल: स्वेच्छया भ्राम्यन् वनात् नगरम् आगत: । नगरे स: रजकस्य गृहं प्रविष्ट: । तत्र स: नीलीभाण्डे पतित: । तत: उत्थाय पलायित: । वनं गत्वा शृगाल: स्वशरीरस्य नीलवर्णम् दृष्ट्वा अचिन्तयत्-अहम् इदानीम् उत्तमवर्ण: । स्वकीयम् उत्कर्षं किमर्थं न साधयामि । शृगालान् आहूय स: वदति — ''अहम् भगवत्या वनदेव्या स्वहस्तेन वनराज्ये अभिषिक्त: । अत:पर वने मम आज्ञया व्यवहार: करणीय: । अन्यये शृगाला: तं विशिष्टवर्णं दृष्ट्वा प्रणम्य वदन्ति — यथा आज्ञापयति देव: ।

(स) अस्माकं भारतीयसंस्कृतौ नारीणां स्थानं महत्त्वपूर्णं वर्तते । वैदिकयुगे मैत्रेयी — गार्गी-लोपामुद्रा-प्रभृतय: महत्य: नार्य: अभवत् । सीता-सावित्री-द्रौपदी-कुन्ती-विदुला प्रभृतय: पुराणयुगस्य उल्लेखनीया: नार्य: आसन् । लक्ष्मी, सरस्वती, पार्वती च देवलोकस्य नार्य: सन्ति । रम्भा-मेनका-उर्वशी-प्रभृतय: अप्सरस: स्वर्गस्य नार्य: सन्ति । पन्नाधात्री, महाराज्ञी पद्मिनी, मीराबाई, जीजाबाई, झांसी राज्ञी लक्ष्मीबाई, राज्ञी दुर्गावती, महाराज्ञी अहल्याबाई च स्वातन्त्र्यसमरकालीना: नार्य: आसन् ।

17. अधोलिखितेषु **द्वयो:** गद्यांशयो: संस्कृते व्याख्या करणीया — 3 + 3 = 6

(अ) पाणिनि: संस्कृतस्य महान् वैयाकरण: आसीत् । पाणिने: जन्म ख्रिस्तपूर्वं सप्तशताब्द्याम् शलातुरग्रामे अभवत् । अत: तस्य 'शलातुरीय:' इति नाम अपि प्रसिद्धम् अस्ति । वर्तमानकाले पाकिस्तानदेशे स्थित: लहुरनामक: ग्राम एव शलातुर ग्राम: अस्ति । पाविने: मातु नाम दाक्षी आसीत् अतएव स: दाक्षीपुत्र: इत्यपि कथ्यते । 'पणिन:' इति तस्य पितु: नाम आसीत् अत: तस्य नाम 'पाणिनि:' अभवत् । आचार्य: वर्ष: पाणिने: गुरु: आसीत् । पाणिनि: 'तक्षशिला' विद्यापीठे शिक्षा प्राप्तवान् ।

(ब) पुराणेषु पुष्करतीर्थस्य बहुमहत्त्वं वर्णितम् अस्ति । प्रतिवर्षं कार्तिकमासस्य पूर्णिमायाम् अत्र मेला भवति । पर्यटन दृष्ट्या पुष्करस्य बहुमहत्त्वम् अस्ति । अत्र बहव: पर्यटका: आगच्छन्ति । अस्माकं दृष्ट्या पुष्करस्य धार्मिके सांस्कृतिकं च महत्त्वं वर्तते । पुष्कर समीपे कनिष्ठपुष्करं, मध्यमपुष्करम् अपि स्त: । समीपे एव भर्तृहरे: गुहा अपि अस्ति । किंचित् दूरे गया कुण्डम अस्ति ।

(स) अथ कदाचित् कमात् शशकस्य अवसर: आगत: । शशक: गमनमार्गे एकं कूपं दृष्टवान् । कूपमध्ये आत्मन: प्रतिबिम्बं दृष्ट्वा स: चिन्तितवान्-अहो, उपाय: दृष्ट: । शशक: अपराह्न-पर्यन्तं तत्रैव स्थित्वा मन्दं-मन्दं सिंहसमीपं गतवान् । सिंह: अपि समयातिक्रमेण बुभुक्षित: कोपाविष्टश्च आसीत् । शशकम् अवलोक्य सिंह: अवदत् — रे शशकाधम ! एकस्तावत् त्वं लघु:, अपरश्च समयातिक्रम: । तस्मात् अपराधात् त्वां विनाश्यप्रात: सकलान् पशून् मारयिष्यामि ।

18. अधोलिखित पद्ययोः कस्यचित् एकस्य हिन्दी भाषायाम् अनुवादः कुरुत — 4

(अ) सुरससुबोधा विश्वमनोज्ञा
लषिता हृध्वा रमणीया
अमृतवाणी संस्कृतभाषा
नैव क्लिष्ट न च कठिना ॥

(ब) अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढ़ः चेतसम् ॥

19. निम्नलिखित पद्ययोः कस्यचित् एकस्य संस्कृते व्याख्यां लिखत — 4

(अ) वहति करे या संस्कृति-कमलम् ,
हसति चारू सित-पंकज-विमलम् ,
वरद-मुद्रया दिशति मङ्गलम् ,
या सुदर्शना बन्ध मोक्षदा
धर्ममयी मम भारतमाता ॥

(ब) क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ॥

20. अधोलिखित प्रश्नेषु केषांचित् **चतुर्णां** प्रश्नानाम् उत्तराणि संस्कृते लिखत — $4 \times 2 = 8$

(क) 'अमृतवाणी संस्कृतभाषा' पाठानुसारेण कर्मदीपिका का कथ्यते ?

(ख) 'यक्षप्रश्नाः' पाठानुसारेण गृहे सतः मित्रं किम् ?

(ग) 'चाणक्य' पाठानुसारेण मगधसाम्राज्ये विश्वविद्यालयस्य नाम किम् आसीत् ?

(घ) 'वन्दे राजस्थानम्' पाठानुसारेण सरस्वती नदी कुत्र प्रवहति ?

(ङ) 'बुद्धिर्यस्य बलं तस्य' पाठानुसारेण शशकः आत्मनः प्रतिबिम्बम् कस्मिन् स्थाने पश्यति ?

(च) 'सूक्तिसुधा' पाठानुसारेण कः जनः अपृष्टो बहुभाषते ?

(छ) 'यस्तु क्रियावान् पुरुषः स विद्वान्' पाठानुसारेण विक्रमः नगरे कतिरात्रिपर्यन्तं निवसति स्म ?

(ज) 'महाराणा प्रतापः' पाठानुसारेण प्रतापस्य मृत्युः कथं अभवत् ?

21. अधोलिखित पाठयोः कस्यचित् एकस्य पाठस्य सारं हिन्दीभाषायां लिखत — 2

यस्तु क्रियावान् पुरुषः स विद्वान् **अथवा** भारतवर्षम् ।

22. अधोलिखित शब्दाधारित **पंच** वाक्यानां निर्माणं कुरुत — 5 × 1 = 5

(i) त्वया (ii) मन्त्रिणा

(iii) खलु (iv) धेनुः

(v) क्रीडित्वा ।

23. स्वपाठ्यपुस्तकात् **द्वौ** श्लोकौ लिखत यौ प्रश्नपत्रेऽस्मिन् न समाविष्टौ । 2 + 2 = 4

24. 'वैद्यरोगी सम्भाषणम्' **अथवा** 'स्वादिष्टं भोजनम्' विषय 6 - 8 वाक्येषु संस्कृतवार्तालापः लिखेयुः । 3

25. स्वं 217 बी, अमृतसरस्य निधिं मत्वा स्वसखीं लतायै स्वस्य जन्मदिवसे आमन्त्रणाय पत्रमेकं संस्कृते लिखत । 3